# Kumbhatakakritam Shiva Stotram

# કુમ્ભાટકકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Kumbhatakakritam Shiva Stotram

File name : kumbhATakakRRitaMshivastotram.itx

Category : shiva, tAmraparNImAhAtmya, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 48/55-66||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# કુમ્ભાટકકૃતં શિવસ્તોત્રમ્

તુષ્ટાવ પરમેશાનં ધર્મં ધર્મભૃતાં વરઃ ।
કુમ્ભાટક ઉવાચ ।
નમો નમસ્તે લોકાનામાદિકર્ત્રે મહાત્મને ॥ ૫૫॥

ધર્માકારાય સારાય શ્રુતીનામાત્મને નમઃ ।
ત્વાં ભજન્તસ્તથા ભક્ત્યા સ્તુવન્તિ ત્વાં સુરાસુરાઃ ॥ ૫૬॥

ધ્યાયન્તિ યોગિનઃ સ્વાન્તે ત્વામેવ ચ પરાત્પરમ્ ।
ત્વત્કૃપાલોકકણિકાલાભમાત્રેણ જન્તવઃ ॥ ૫૭॥

જગત્ક્ષોભયિતું કર્તું ત્રાતું પટુતરો ભવાન્ ।
ત્વન્મુખાન્નિર્ગતા વેદા મર્યાદાં વ્યક્તયન્તિ તે ॥ ૫૮॥

તેષુ તેષુ ચ વર્તન્તે ત્વદાજ્ઞાગૌરવાય તે ।
યેષાં ત્વં વિમુખો દેવ તે વૈ સીદન્તિ સર્વદા ॥ ૫૯॥

ત્વદાલમ્બનયોગેન સિદ્ધયોઽષ્ટૌ ન સંશયઃ ।
ઐહિકામુષ્મિકૌ માર્ગૌ ત્વત્સૃષ્ટૌ લોકહેતવે ॥ ૬૦॥

નમઃ પૂર્વાય પૂર્વાણાં પુરુષાય મહાત્મને ।
વૃષાય વૃષરૂપાય વેદરૂપાય તે નમઃ ॥ ૬૧॥

ત્વચ્છક્ત્યા ધાર્યતે સર્વં ત્વલ્લીલાકલનાત્મકમ્ ।
ત્વં વિષ્ણુસ્ત્વં શિવો બ્રહ્મા ત્વં મિત્રો વરુણો યમઃ ॥ ૬૨॥

ત્વં ગુણૈસ્ત્રિગુણાભિખ્યાં બિભર્ષિ કલયા સ્વયા ।
પ્રસીદ દેવદેવેશ પ્રસીદ પરમેશ્વર ॥ ૬૩॥

નમો નમઃ કારણકારણાય તે કલાવિશેષૈઃ કલિતાખિલાત્મને ॥ ૬૪॥

પ્રસીદ વિશ્વેશ્વર વિશ્વમૂર્તે પ્રસીદ દેવેશ દયાસુધાનિધે ।
ઇતિ સ્તુત્વા સ કુમ્ભાટો ભક્ત્યા પરવશો મુહુઃ ।

પ્રણામમમકરોત્તસ્મૈ દણ્ડવત્ પુરતો વિભોઃ ॥ ૬૬॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ૪૮-અધ્યાયાન્તર્ગતં
કુમ્ભાટકકૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૪૮/૫૫-૬૬॥

tAmraparNImAhAtmya . adhyAya 48/55-66..

Proofread by PSA Easwaran

---

*Kumbhatakakritam Shiva Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*